# बि.ए संस्कृतव्याकरणप्रक्रमः

## प्रथमं षाण्मास्यम्

### I B 111 Vy संज्ञापरिभाषम्

उपलब्धिः - 3

पाठ्यकालांशाः - 90 घण्डाः

**लक्ष्यम् -**

छात्राणां कृते पाणिनीयसूत्राणाम् परिचायनम्।

**उद्धेश्यानि -**

षड्विधानि सूत्राणि परिचाययितुं तथा संज्ञापरिभाषाप्रकरणे (लघुसिद्धान्तकौमुदी) बोधयितुं चायम् प्रक्रमः स्वीकृतः।

**विषयस्वरूपम् –**

**प्रथमांशः** - संज्ञाप्रकरणम्।

**द्वितीयांशः** - संज्ञाप्रकरणम्।

**तृतीयांशः** - परिभाषाप्रकरणम्।

**चतुर्थांशः** - परिभाषाप्रकरणम्।

### I.C.128Vy संस्कृतसाहित्येतिहासः

उपलब्धिः - 3

पाठ्यकालांशाः - 90 घण्डाः

**लक्ष्यम् -**

आधुनिकप्राचीनकालयोः संस्कृतपठनस्य प्रसक्तिसूचनम् ।

**उद्धेश्यानि –**

- संस्कृतक्षेत्रे विद्यमानानां ज्ञानश्रोतसाम् अवबोधनम्,पौराणिककृतीनां वैदिककृतीनां च परिचयः।
- संस्कृतसाहित्ये विद्यमानानां पौराणिककृतीनां संक्षिप्तावबोधनम् ।
- संस्कृते विद्यमानवैज्ञानिकसाहित्यपरिचायनद्वारा संस्कृतस्याधुनिकप्रसक्तेः उद्बोधनम् ।
- संस्कृतस्य आधुनिकालिकीनां कांसाञ्चन कृतीनां परिचायनम् ।

**विषयस्वरूपम् -**

**प्रथमांशः -**

वैदिकसाहित्येतिहासः – वेदानां संक्षिप्तचरितं, वेदाङ्गानि, स्मृतिग्रन्थाः, दर्शनसाहित्यस्य इतिहासः (आस्तिकनास्तिकदर्शनानां परिचायनम् ।)

**द्वितीयांशः -**

पौराणिकसाहित्यस्य चरितम् - इतिहासः, पुराणानि, पञ्चमहाकाव्यानां परिचायनम्, बाणदण्ड्यादीनां कृतीनां परिचायनम्, भासकालिदासभवभूत्यादीनां नाटकानि, श्रीशङ्करभर्तृहर्यादीनां साहित्यकृतीनां परिचायनम् ।

**तृतीयांशः -**

संस्कृते वैज्ञानिकसाहित्यस्य इतिहासः (संस्कृते विद्यमानधनतत्वशास्त्रस्य औषधशास्त्रस्य वानशास्त्रस्य गणितशास्त्रस्य च संगीतस्य नृत्तस्य च विषयः ।)

**चतुर्थांशः -**

संस्कृते आनुकालिकानां पत्रिकानां च परिचायनम् ।

# द्वितीयं षाण्मास्यम्

## II.B.112 Vy सन्धित्रयम्

उपलब्धयः - 3

पाठ्यकालांशाः - 90 घण्डाः

**लक्ष्यम्** -

संस्कृतग्रन्थेषु विद्यमानानां सन्धिनियमानाम् अवबोधः ।

**उद्धेश्यानि** -

- सन्धिविषयकानां सूत्राणां उदाहरणानि अर्थज्ञानञ्च ।
- सन्धि- संयोगज्ञानं, स्वर-हल्-विसर्गसन्धीनां अवगमनम् ।
- शब्दानां प्रक्रियाज्ञानार्जनाय छात्रान् सामर्थ्यावाप्तिः, व्याकरणनियमानुसारि प्रक्रियाज्ञानम् ।

**विषयस्वरूपम्** -

**प्रथमांशः - अच्सन्धिः प्रथमो भागः ।**

सिद्धान्तकौमुद्याः अधोनिर्दिष्टानि सूत्राणि।

1. इको यणचि ।
2. अनचि च ।
3. स्थानिवदादेशोऽनल्विधौ ।
4. झलां जश् झशि ।
5. अदर्शनं लोपः ।
6. संयोगान्तस्य लोपः ।
7. अचो रहाभ्यां द्वे ।
8. हलो यमां यमि लोपः ।
9. एचोऽयवायावः।
10. तस्य लोपः ।

11. वान्तो यि प्रत्यये ।
12. क्षय्यजय्यौ शक्यार्थे ।
13. क्रय्यस्तदर्थे ।
14. लोपः शाकल्यस्य ।
15. एकः पूर्वपरयोः ।
16. आद्गुणः ।
17. उरण् रपरः ।
18. झरो झरि सवर्णे ।
19. वृद्धिरेचि ।
20. एत्येधत्यूठ्सु ।
21. उपसर्गादृति धातौ ।
22. खरवसानयोर्विसर्जनीयः।

**द्वितीयांशः - अच् सन्धिः द्वितीयो भागः।**

सिद्धान्तकौमुद्याः अधोनिर्दिष्टानि सूत्राणि।

1. एङि पररूपम् ।
2. अचोऽन्त्यादि टि ।
3. ओमाङोश्च ।
4. झलां जशोऽन्ते ।
5. अकः सवर्णे दीर्घः।
6. एङः पदान्तादति ।
7. सर्वत्र विभाषा गोः।
8. अवङ् स्फोटायनस्य ।
9. इन्द्रे च ।
10. प्लुत प्रगृह्या अचि नित्यम् ।
11. इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ।
12. ऋत्यकः।
13. ईदूदेद्विवचनं प्रगृह्यम् ।
14. अदसो मात् ।
15. निपात एकाजनाङ् ।
16. ओत् ।
17. सम्बुद्धौ शाकल्यस्येतावनार्षे ।

18. ईदूतौ च सप्तम्यर्थे ।

**तृतीयांशः - हल्सन्धिः ।**

सिद्धान्तकौमुद्याः अधोनिर्दिष्टानि सूत्राणि।

1. स्तोः श्चुना श्चुः।
2. शात् ।
3. ष्टुना ष्टुः।
4. न पदान्ताट्टोरनाम् ।
5. यरोऽनुनासिकेऽनुनासिको वा ।
6. तोर्लि ।
7. उदः स्थास्तम्भोः पूर्वस्य ।
8. झयो होऽन्यतरस्याम् ।
9. शश्छोऽटि ।
10. खरि च ।
11. मोऽनुस्वारः।
12. नश्चापदान्तस्य झलि ।
13. अनुस्वारस्य ययि परसवर्णः।
14. वा पदान्तस्य ।
15. ङ्णोः कुक्टुक्शरि ।
16. डः सि धुट् ।
17. नश्च ।
18. शि तुक् ।
19. ङमो ह्रस्वादचि ङमुण्नित्यम् ।
20. नश्छव्यप्रशान् ।
21. दीर्घात् ।
22. पदान्ताद्वा ।

**चतुर्थांशः - विसर्गसन्धिः।**

सिद्धान्तकौमुद्याः अधोनिर्दिष्टानि सूत्राणि।

1. विसर्जनीयस्य सः।

2. शर्परे विसर्जनीयः।
3. वा शरि।
4. इणः षः।
5. नमस्पुरसोर्गत्योः।
6. इदुदुपधस्य चाप्रत्ययस्य।
7. तिरसोऽन्यतरस्याम् ।
8. द्विस्त्रिश्चतुरिति कृत्वोऽर्थे।
9. इसुसोः सामर्थ्ये ।
10. नित्यं समासेऽनुत्तरपदस्थस्य ।
11. अतः कृकमिकंसकुम्भपात्रकर्णकुशाकर्णीष्वनव्ययस्य ।
12. अधश्शिरसी पदे ।
13. ससजुषो रुः।
14. अतो रोरप्लुतादप्लुते ।
15. हशि च ।
16. भो भगोअघोअपूर्वस्य योऽशि ।
17. ओतो गार्ग्यस्य ।
18. हलि सर्वेषाम्।
19. रोऽसुपि ।
20. रो रि ।
21. ढ्रलोपे पूर्वस्य दीर्घोऽणः।
22. विप्रतिषेधे परं कार्यम् ।
23. एतत्तदोः सुलोपोऽकोरनञ्समासे हलि ।
24. सोऽचि लोपे चेत्पादपूरणम् ।

**अवलोकनीयः ग्रन्थः -**

सिद्धान्तकौमुदी, भट्टोजिदीक्षितः।

**अधिकविज्ञानार्थमवलोकनीयः ग्रन्थः -**

प्रक्रियासर्वस्वम्, मेल्पुत्तूर् नारायणभट्टतिरिः।

# I.C.129 Vy शङ्करजीवनं दर्शनञ्च

**उपलब्धयः** - 3

**पाठ्यकालांशाः** - 90 घण्डाः

**लक्ष्यम्** -

श्रीशङ्कराचार्यस्य दर्शनं जीवनञ्च अधिकृत्य अवबोधः।

**उद्धेश्यानि** –

शङ्करस्य जीवनं दर्शनं च अधिकृत्य परिचायनम्।

**विषयस्वरूपम्** -

**प्रथमांशः** - श्रीशङ्कराचार्यचरितम् - आदिमम् अध्यायत्रयम्।

**द्वितीयांशः** - श्रीशङ्कराचार्यचरितम् - चतुर्थाध्यायादारभ्य षष्ठाध्यायपर्यन्तम्।

**तृतीयांशः** - श्रीशङ्कराचार्यचरितम् - सप्तमाध्यायादारभ्य नवमाध्यायपर्यन्तम्।

**चतुर्थांशः** - आत्मबोधः।

**पाठपुस्तकम्** -

श्रीशङ्कराचार्यचरितम् - गोविन्दनाथः, सम्पादकः - संस्कृतविद्वान् के.एन्.एम्. दिवाकरन् नम्पूतिरिः।

आत्मबोधः।

**आधारग्रन्थाः** -

Environmental Awareness from Vedic to Modern period. - सम्पादिका - डा. पि. श्यामलादेवी।

श्री भगवद्गीताचरित्रम्, कालटी - कृष्णशास्त्री, प्रकाशकः - श्रीमदभिनवविद्यातीर्थ महास्वामिविद्यासमितिः।

## II.C. 130 Vy. - प्राथमिकसंस्कृतम्

**उपलब्धयः** - 4

**पाठ्यकालांशाः** – 90 घण्डाः

**लक्ष्यम् -**

प्रायोगिक/ प्राथमिकव्याकरणज्ञानप्रदानम् लक्ष्यम् । संस्कृतस्य बालपाठान् ज्ञापयितुं प्राथमिकस्तरे अत्यन्तम् अपेक्षितं ये व्याकरणांशाः वर्तन्ते तान् अत्र लघु सरलवाक्यैः गद्यांशैः श्लोकैः च क्रियते । प्रतिपाद्यन्ते ।

**उद्धेश्यानि -**

संस्कृतभाषायाः सम्पदं छात्रान् परिचाययितुम् उद्धिश्यायं पाठ्यविषयः स्वीकृतः ।

**विषयस्वरूपम् -**

**पाठ्यांशः १ -**

भाषायाः स्वरूपम्- अक्षराणि पदानि कैरल्यां विद्यमानानि पदानि सञ्चित्य तेषां संस्कृतपदसम्पत्तिवर्धकानि परिशीलनानि वृत्तिः व्यापारः, विग्रहः इत्यादीनाम् आधुनिकसन्दर्भे परिचायनम् । तदर्थं अधोनिर्दिष्टरीत्या संस्कृतभाषायां तथा भाषायाः प्राथमिकव्याकरणञ्च अस्मिन् पाठ्यांशो पाठनीयम् । सामान्यपरिचयः - अक्षरमाला, अजन्तहलन्तशब्दाः, सुबन्तानि, तिङन्तानि, अव्ययम्, विभक्त्यर्थाः, लिङ्गवचनानि, धातुलकारपुरुषाः । (बाल, कवि, गुरु, पितृ, लता, नदी, श्रीः, मातृशब्दः, तच्छब्दस्य त्रिषु लिङ्गेषु अस्मद्युष्मच्छब्दौ च, एवं भूधातोः, वन्द् धातोश्च दशलकारेषु रूपाणि।)

**पाठ्यांशः २ -**

श्रीरामोदन्तम् (प्रथमश्लोकादारभ्य ३० श्लोकाः। श्रीपतिं प्रणिपत्याहं...इत्यारभ्य... कौशिकस्य करे ददौ।। इति पर्यन्तम्।)

पाठ्यांशः ३ -

सुप्रसिद्धानां २० सुभाषितानां सामान्यम् अध्ययनम् ।

1. सर्वभाषोद्भवस्थाना संस्कृत्या चैव भूषिता ।
   कथ्यते मृतभाषेति किमतः परमादरः ।।

2. गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।

   गुरुस्साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः ।।

3. अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।

   चक्षुरुन्मीलितं येन तस्मै श्री गुरवे नमः ।।

4. न राष्ट्रं राष्ट्रतां याति

   यदयसंघटिताः जनाः ।

   निदानं राष्ट्रभावस्य

   सुसंघटितजीवनम् ।।

5. शास्त्राण्यधीत्यापि भवन्ति मूर्खाः
   यस्तु क्रियावान् कुशलः स विद्वान् ।

   सुचिन्तितं चौषधमातुराणां

   न नाममात्रेण करोत्यरोगम् ।।

6. मूढ जहीहि धनागमतृष्णां
   कुरु सद्बुद्धिं मनसि वितृष्णाम् ।

   यल्लभसे निजकर्मोपात्तं

   वित्तं तेन विनोदय चित्तम् ।।

7. पुराणमित्येव न साधु सर्वं
   न चापि काव्यं नवमित्यवद्यम् ।

   सन्तः परीक्ष्यान्यतरद्भजन्ते

मूढः परप्रत्ययनेयबुद्धिः ।।

8. एहि ब्रूहि समाधेहि
समाश्वसिहि मा स्म भैः ।

आपन्नमिति यो ब्रूयात्

तस्य लोको वशंवदः ।।

9. उत्साहसंपन्नमदीर्घसूत्रं
क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।

शूरं कृतज्ञं दृढसौहृदं च

लक्ष्मीः स्वयं याति निवासहेतोः ।।

10. इदमन्धं तमः कृत्स्नं
जायेत भुवनत्रयम् ।

यदि शब्दाह्वयं ज्योति-

रासंसारं न दीप्यते ।।

11. पद्माकरं दिनकरो विकचीकरोति
चन्द्रो विकचीकरोति कैरवचक्रवालम् ।

नाभ्यर्थितो जलधरो पि जलं ददाति

सन्तः स्वयं परहिते विहिताभियोगः ।।

12. विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः ।

यशसि चाभिरतिर्व्यसनं श्रुतौ

प्रकृतिसिद्धमिदं हि महात्मनाम् ।।

13. लोभश्चेदगुणेन किं पिशुनता यद्यस्ति किं पातकैः
सत्यं चेत्तपसा च किं शुचिमनो यद्यस्ति तीर्थेन किम् ।

सौजन्यं यदि किं बलेन महिमा यद्यस्ति किं मण्डनैः

सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना ।।

14. छिन्नोऽपि रोहति तरुः
क्षीणोऽप्युपचीयते पुनश्चन्द्रः ।
इति विमृशन्तः सन्तप्यन्ते
न विश्लथेषु लोकेषु ।।

15. यौवनं धनसम्पत्तिः
प्रभुत्वमविवेकिता ।
एकैकमप्यनर्थाय
किमु यत्र चतुष्टयम् ।।

16. प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहताः विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजनाः न परित्यजन्ति ।।

17. केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्वला
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ।।

18. विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरतिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम् ।।

19. अकरणत्वमकारणविग्रहः परधने परयोषिति च स्पृहा ।
सुजनबन्धुजनेष्वसहिष्णुता प्रकृतिसिद्धमिदं हि दुरात्मनाम् ।।

20. विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः ।

विद्या बन्धुजनो विदेशगमने विद्या परा देवता

विद्या राजसु पूज्यते न हि धनं, विद्याविहीनः पशुः ।।

**पाठ्यांशः ४ -**

गद्यांशानां भाषान्तरीकरणम्, सरलसंस्कृत वाक्यानां रचना, रचनापुस्तकानां सहाय्येन सरलवाक्यरचनायै सामर्थ्यसम्पादनम् ।

**पठनग्रन्थाः -**

प्रथमादर्शः, बालादर्शः (केरलसर्वकलाशालया प्रकाशितः)

**आधारग्रन्थाः -**

1. प्रक्रियाभाष्यम् - फा.जोण् कुन्नप्पिल्ली, सर्वकारीय महाविद्यालयः – पूर्णवेदपुरी ।
2. संस्कृतदीपिका - के,पि,एस् शास्त्री, श्रीरामकृष्णमठ - पाला ।
3. *Higher Sanskrit Grammar,* M.R. Kale, Motilal Banarsidass, New Delhi.
4. संस्कृतभाषा (भागत्रयम्) काणिप्पय्यूर् शङ्करन् नम्पूतिरि, पञ्चाङ्गम् प्रेस् कुन्नङ्कलम् ।
5. लघुसंस्कृतम् – डा.के जी पौलोस्, वल्लत्तोल् विद्यापीठम् एडप्पाल् ।
6. सुभाषितसाहस्री चौखम्बा संस्कृत सीरीज्, वाराणसी ।

## <u>तृतीयं षाण्मास्यम्</u>

### III.B. 113 Vy सुबन्तः

उपलब्धयः - 4

पाठ्यकालांशाः - 90

**लक्ष्यम् -**

नामशब्दानां निरुक्तिं कर्तुं छात्रान् सामर्थ्यसम्पादनाय उद्धिश्य अयं प्रक्रमः निश्चितः।

**उद्धेश्यानि -**

1. नामशब्दानां व्युत्पत्तिसम्पादनाय छात्रान् पाठयितुं कानिचन सूत्राणि प्रतिपादिकानि प्रत्ययाः इत्यादयः सार्थं परिचायनम्।
2. पुल्लिङ्ग स्त्रीलिङ्ग नपुंसलिङ्गशब्दानां प्रक्रियाद्धारा परिचायनम्।

**विषयस्वरूपम् -**

**पाठ्यांशः १ – अजन्तपुल्लिङ्गप्रकरणम्।**

राम, सर्व, हरि, गुरु, पितृ, गो शब्दानां ससूत्रं स्ववार्तिकंश्च प्रक्रिया परिचायनम्।

**पाठ्यांशः २ - अजन्तस्त्रीलिङ्गप्रकरणम्।**

रमा, मतिः, गौरी, मातृ शब्दानां प्रक्रिया पाठनम्। तदर्थं आवश्यकानि सूत्राणि च अस्मिन्

पाठ्यांशे अध्येतव्यानि।

**पाठ्यांशः ३ - हलन्तपुल्लिङ्गप्रकरणम्।**

लिह्, दुह्, रजन्, युष्मद्, अस्मद्, महत् शब्दाः, आवश्यकानि सूत्राणि च।

**पाठ्यांशः ४ - हलन्तस्त्रीलिङ्गप्रकरणम्।**

उपानह्, गीर्, अप् शब्दाः अवश्यकानि सूत्राणि च।

**हलन्तनपुंसकलिङ्गप्रकरणम्।**

अदन्,तुदत् , पयस् शब्दाः सूत्राणि च।

**पाठ्यग्रन्थाः -**

लघुसिद्धान्तकौमुदी ।

**आधारग्रन्थाः -**

सिद्धान्तकौमुदी ।

## III.C. 131 Vy. – न्यायवैशोषिकम्

**उपलब्धयः - 4**

**पाठ्यकालांशाः - 90 घण्डाः**

**लक्ष्यम् -**

दार्शनिकविषयाणां संक्षिप्त परिचायनम् ।

**उद्धेश्यानि -**

1. न्यायदर्शनस्य इतिहासः परिचायनम् ।
2. न्यायदर्शनस्य विभागः परिचायनम् ।
3. पञ्चभूतानां परिचायनम् , वैशेषिकदर्शनस्य परिचायनम् च ।
4. न्यायवैशेषिक दर्शनयोः वातानां परिचायनम् ।
5. न्यायदर्शनस्य प्राथमिकग्रन्थस्यतर्कसंग्रहस्य विशदं पठनम् ।

**विषयस्वरूपम् -**

**पाठ्यांशः १** – न्यायशास्त्रस्य उत्पत्तिविकासौ, न्यायशास्त्रस्य प्राचीनाः आचार्याः, न्यायशास्त्रस्य प्राथमिकग्रन्थानां परिचायनम् ।

**पाठ्यांशः २** – वैशेषिकदर्शनस्य उत्पत्तिविकासौ, तस्य विषयाः न्यायवैशेषिक सिद्धान्तानां परिचायनम् । अन्नंभट्टकृत तर्कसंग्रहस्य व्याख्यानानां परिचायनम् ।

**पाठ्यांशः ३** - तर्कसङ्ग्रहः- शास्त्रप्रयोजनम्, पदार्थाः, विशेषः, द्रव्याणि, गुणाः, कर्माणि,

सामान्यम्, विशेषः, समवायः, अभावः, कार्यकारणभावः, कारणभेदाः, बुद्धिभेदाः।

पाठ्यांशः ४ - तर्कसङ्ग्रहः - प्रमाणानि, प्रत्यक्षम्, इन्द्रियार्थसन्निकर्षाः, अनुमानम्, उपमानम्, शब्दः, शक्तिः, लक्षणा, शाब्दबोधः, शाब्दबोधकारणानि, सङ्केतविवृत्तिश्च ।

**पाठ्यग्रन्थाः -**

तर्कसङ्ग्रहः-अन्नंभट्टः।

**आधारग्रन्थाः -**

1. *History of Indian Logic,* Satish Candra Vidya Bhusan.
2. *Indian Philosophy,* Dr. S. Radhakrishnan.
3. न्यायसूत्रम् - गौतमः ।
4. न्यायभाष्यम् - वात्स्यायनः ।

## III.C.132 Vy गद्यम् पद्यञ्च

**उपलब्धयः** - 4

**पाठ्यकालांशाः** - 90

### लक्ष्यम् -

गद्यपद्यसाहित्यम् छात्रान् परिचाययितुम् अभिलक्ष्यास्य विषयस्य पाठ्यांशरूपेण स्वीकारः कृतो वर्तते ।

**उद्धेश्यानि -**

१. गद्य/विवरणसाहित्यस्य सामान्यं परिचायनम् ।
२. संस्कृते भारतीयकाव्यशास्त्रावगतिः ।
३. सामान्यरूपेण काव्यानां महाकाव्यानां च परिचायनम् ।
४. संस्कृते गद्यरचनायै यामर्थ्यसम्पादनम् रचनाशैल्यवगमनञ्च ।

**विषयस्वरूपम् -**

**पाठ्यांशः १ –** संस्कृते विवरणसाहित्यमधिकृत्य सामान्यम् संक्षिप्य परिचायनम् ।

**पाठ्यांशः २ –** विष्णुशर्मणः पञ्चतन्त्रकथायाः अध्ययनम् ।

1. मित्रभेदस्य द्वितीया कथा -
   (शृगालदुन्दुभिकथा-कश्चिच्छृगालः क्षुत्क्षामकण्ठः संजीवकः आह-कथमेतत्। सो ब्रवीत्)

2. अपरोक्षितकारकस्य आमुखकथा (प्रस्थावनकथा-मणिभद्रश्रेष्ठिवृत्तान्तः- अथेदमारभ्यते अपरीक्षितकारकं नाम--- मणिभद्र आह। ते धर्मविकारिणः प्रोचुः।)

**पाठ्यांशः ३ -** संस्कृतकाव्यसाहित्यस्य सामान्यपरिचायनम् ।

**पाठ्यांशः ४ -** अधोनिर्दिष्टयोः ग्रन्थयोः व्याकरणपूर्वकम् अध्ययनम् ।

रघुवंशः – पञ्चमकाण्डः(1-30 श्लोकाः तमध्वरे विश्वजिति - तं भूपतिर्भासुरहेमराशिम्))

भजगोविन्दम् (1-15 श्लोकाः भजगोविन्दम् - अङ्गं गलितम्)

## <u>चतुर्थं षाण्मास्यम्</u>

### IV B.114 Vy. कारकम् स्त्रीप्रत्ययश्च

**उपलब्धयः - 4**

**पाठ्यकालांशाः - 90**

**लक्ष्यम् -**

विभक्तीनां स्त्रीत्वबोधकशब्दानां च उपयोगाय छात्रान् समर्थान् कर्तुम् उद्दिश्यायं पाठ्यविषयः निश्चितः ।

**उद्धेश्यानि -**

१. संस्कृते वाक्यानां घटनापरिचायनम् ।

२. स्त्रीप्रत्ययविधायकानां सूत्राणां परिचायनम् तद्वारा स्त्रीलिङ्गरूपाणां निर्माणम्, व्युत्पत्तिज्ञानञ्च, स्त्रीप्रत्ययान्तरूपाणां प्रयोगः च।

**विषयस्वरूपम् -**

**पाठ्यांशः १ –** प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा - कालाध्वनोरत्यन्तसंयोगे इति पर्यन्तम् पा.पु- म.सि.कौ ।

पाठ्यांशः २ – स्वतन्त्रः कर्ता सूत्रादारभ्य प्रतिनिधिप्रतिदाने स यस्मात् इति सूत्रपर्यन्तं पा.पु- म.सि.कौ ।

**पाठ्यांशः ३ -** षष्ठी शेषे सूत्रादारभ्य यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी इति सूत्रपर्यन्तम्।

**पाठ्यांशः ४ -** अधोनिर्दिष्टानां सूत्राणां उदाहरणानि अर्थसहितम्- (सि.कौ - स्त्रीप्रत्ययप्रकरणम्)।

1. स्त्रियाम्।
2. अजाद्यतष्टाप्।
3. टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः नञ्स्नञीकक्ख्युंस्तरुणतलुनामुपसंख्यानम्।
4. उगितश्च।
5. यञश्च।
6. हलस्तद्धितस्य।
7. प्राचां ष्फ तद्धितः।
8. आयनेयीनीयीयः फढखछघां प्रत्ययादीनाम्।
9. षिद्गौरादिभ्यश्च।
10. वयसि प्रथमे।
11. द्विगोः।
12. वर्णादनुदात्तात्तोपधात्तो नः।
13. वोतो गुणवचनात्।

14. बह्वादिभ्यश्च। कृदिकारादक्तिनः। सर्वतोऽक्तिनर्थादित्येके।
15. पुंयोगादाख्ययाम्। पालकान्ताद्वा।
16. प्रत्यस्थात्कात्पूर्वस्यात इदाप्यसुपः। सूर्याद्देवतायां चाप् वाच्यः।
17. सूर्यागस्त्ययोश्छे च ङ्यां च।
18. इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् हिमारण्ययोर्महत्वे। यवाद्दोषे। यवनाल्लिप्याम्। मातुलोपाध्ययोरानुग्वा। आचार्यादणत्वं च। अर्यक्षत्रियाभ्यां वा स्वार्थे।
19. क्रीतात् करणपूर्वात्।
20. स्वाङ्गाच्चोपसर्जनादसंयोगोपाधात्।
21. न क्रीडादिबह्वचः।
22. नखमुखात्संज्ञायाम्।
23. पूर्वपदात्संज्ञायामगः।
24. जातेरस्त्रीविषयादयोपधात्।
25. योपधप्रतिषेधे हयगवयमुकयमनुष्यमत्स्यानामप्रतिषेधः। मत्स्यस्य ङ्याम्।
26. इतो मनुष्यजातेः।
27. ऊङुतः।
28. पङ्गोश्च।
29. ऊरूत्तरपदादौपम्ये।
30. संहिताशफलक्षणवामोदेश्च।
31. शार्ङ्गरवाद्यञो ङीन्।नृनरयोर्वृद्धिश्च।
32. यूनस्तिः।

**अवलम्बग्रन्थाः –**

प्रो. आर्. वासुदेवन् पोट्टि- कारकप्रकरणम्- मलयालम्।

मेल्पुत्तूर् नारायणभट्टतिरिः- प्रक्रियासर्वस्वम्-सुबर्थखण्डः-स्त्रीप्रत्ययखण्डः

## IV.C. 133 Vy वृत्तम् अलङ्कारः नाटकञ्च

उपलब्धयः - 4

पाठ्यकालांशाः - 90

**लक्ष्यम् -**

१. पद्यम् नाटकम् इत्यादीनां अवगमनाय छात्रान् परिचायनाय उद्दिष्टोऽयं विषयः।
२. उच्चारणम् पद्यांशस्य रटने च सम्यग् उच्चारणम्।
३. वृत्तानाम् अलङ्काराणाञ्च ज्ञानाय लघुगुरु व्यवस्थादीनां परिचायनम् तद्वारा काव्यांशेषु स्वयं प्रयोगेण वृत्तालङ्कारादीनाम् अवगतिः।

**उद्धेश्यानि -**

१. कानिचनानां सामान्यानां वृत्तानाम् अलङ्काराणाञ्च परिचायनम्।
२. नाटके नाटकसाहित्ये च उपयुक्तानां केषाञ्चन साङ्केतिकपदानां परिचायनम्।

**विषयस्वरूपम् -**

**पाठ्यांशः १ –** वृत्तालङ्कारयोः सामान्यं परिचायनम्। वृत्तानां प्रकाराः – वर्णवृत्तम्, मात्रावृत्तम्, समवृत्तम्, अर्धसमवृत्तम्, विषमवृत्तम्। श्लोकानाम् लघुगुरु निर्णयः क्रमिका गणव्यवस्था। लघुगुरुविन्यासः अलङ्काराः – शाब्दिकाः, आर्थिकाः उभयालङ्काराः च।

**पाठ्यांशः २ –** वर्णवृत्तानि – वसन्ततिलकम्, वंशस्थम्, इन्द्रवज्रा, उपेन्द्रवज्रा, उपजाति, मालिनी मन्द्राक्रान्ता, स्रग्धरा, शार्दूलविक्रीडितम्, वियोगिनि।

मात्रावृत्तानि – आर्या, गीती

**पाठ्यांशः३ -** उपमा, उत्प्रेक्षा,रूपकम्, वक्रोक्तिः, अतिशयोक्तिः,स्वभावोक्तिः, विभावना,

समासोक्तिः,अर्थान्तरन्यासः, विरोधाभासः।

**पाठ्यांशः ४ -** संस्कृतनाटकानां विशेषाः। उद्धवः, विकासः,रूपकानां निर्वचनम्। रूपकाणां प्रकाराः। वस्तु, नेता, रसः, नान्दी, भरवाक्यम् प्रस्तावना प्रवेशकम्, विष्कम्भकम्। अर्थप्रकृतयः, सन्धिः एतान् परिचाययितुं सुप्रसिद्धानां नाटकानां कालिदासीय शाकुन्तलादिनां द्वारा शक्यते।

**अवलम्बग्रन्थाः –**

(पाठ्यांशेषु निर्दिष्टाः अंशा एव पर्याप्ताः)

१. कुवलयानन्दः - अप्पय्यदीक्षितः।
२. दर्शरूपकम् - धनञ्जयः।
३. *Sanskrit –English Dictionary, V.S.Apte.*

**आधारग्रन्थाः-**

१. छन्दश्शास्त्रम् - पिङ्गलः।
२. वृत्तरत्नावली - गोमतीदासः।
३. साहित्यदर्पणम् (अध्यायः- ६ & ७) – विश्वनाथः।
४. नाट्यशास्त्रम् – भरतः।

## <u>पञ्चमं षाण्मास्यम्</u>

### V.B. 115 Vy **समासः**

**उपलब्धयः** - 4

**पाठ्यकालांशाः** - 90

**लक्ष्यम् -**

समासस्य तथा तद्विभागानां परिचायनम्।

**उद्धेश्यानि -**

१. अत्यन्तापेक्षितानां समासविधायकानां सूत्राणां तथा उदाहरणानां पठनम्।
- अव्ययीभावसमासः
- तत्पुरुषसमासः
- बहुव्रीहिसमासः

- द्वन्द्वसमासः

**विषयस्वरूपम् -**

**पाठ्यांशः** १ – अव्ययीभावसमासप्रकरणम्।

**पाठ्यांशः** २ - तत्पुरुषसमासप्रकरणम्। (उपमानानि सामान्यवचनैः इति सूत्रपर्यन्तम्)

**पाठ्यांशः** ३ - बहुव्रीहिसमासप्रकरणम्। (पूर्णम्)

**पाठ्यांशः** ४ - द्वन्द्वसमासप्रकरणम्। (पूर्णम्)

**अवलम्बग्रन्थः-**

लघुसिद्धान्तकौमुदी

**आधारग्रन्थः -**

सिद्धान्तकौमुदी

## V.B.116 Vy व्याकरणशास्त्रप्रणाली

**उपलब्धयः** - 4

**पाठ्यकालांशाः** - 90 घण्डाः

**लक्ष्यम्** :

पाणिनेः व्याकरणस्य शास्त्रीयसिद्धान्तशैलीनां परिचायनम्।

पदशास्त्रनिर्माण(सूत्रादिद्वारा) परिचायनम्।

**उद्धेश्यानि** :

१. संस्कृतव्याकरणस्य उद्भवविकासौ।
२. अपाणिनीयव्याकरणपरिचायनम्।

३. प्रस्थानद्वयम् - काशिका, प्रक्रिया - परिचायनम्।

४. भाषाशास्त्रस्य परिचायनम्।

५. अष्टाध्याय्याः घटनाबोधनम्।

६. संस्कृतव्याकरणस्य तन्त्राणां परिचायनम्।

७. न्यायव्याकरणमीमांसानां शाब्दबोधस्य प्राथमिकतत्त्वानां बोधनम्।

**विषयस्वरूपम् -**

**पाठ्यांशः १ – संस्कृतव्याकरणशास्त्रस्य उद्भवः विकासश्च।**

व्याकरणम् - उद्भवः विकासः, अष्टाध्यायी, वार्त्तिकम्, महाभाष्यम्, अर्वाचीनव्याकरणानि।

**पाठ्यांशः २ - पद्धतिः दर्शनञ्च।**

काशिकापद्धतिः, प्रक्रियापद्धतिः, व्याकरणदर्शम्।

**पाठ्यांशः ३ – अष्टाध्याय्याः स्वरूपं शैली च।**

सूत्रपाठः - वृद्धिरादैच् इत्यतः आरभ्य दश सूत्राणां सवृत्तिकोच्चारणाभ्यासः।

**पाठ्यांशः ४ - शाब्दबोधः।**

व्याकरणन्यायपूर्वमीमांसानां शाब्दबोधप्रकाराः।

**ग्रन्थाः - पाठ्यांशाः १ & २**

संस्कृत व्याकरणशास्त्र का इतिहास

Systems of Sanskrit Grammar

Post-Paninian systems of Grammar

संस्कृतव्याकरणचरितम् - डा.जि. गङ्गाधरन् नायर्

Evolution of Paninian Grammar - Edited by Dr. A.Girija & Dr. G. Gangadharan Nair

**ग्रन्थाः - पाठ्यांशः ३**

Techniques of Astadhyayi - Saroja Bhate

Technical Terms in Paninian Grammar - A Grammatical March - Panini to Patanjali

Panini - George Cardonna

**ग्रन्थाः - पाठ्यांशः ४**

भूषणसारः - कौण्डभट्टः

अर्थसङ्ग्रहः - लौगाक्षिभास्करः।

Theories of Meaning - Dr. K. Kunjunni Raja

Knowledge Representation in Sanskrit Grammar and Modern Linguistics

Patanjali - A Grammarian & Philosopher and other essays

## V.B.117 Vy   महाभाष्यम् (I & II आह्निके)

**उपलब्धयः  -  4**

**पाठ्यकालांशाः - 90 घण्डाः**

**लक्ष्यम् :**

संस्कृतव्याकरणस्य प्राथमिकतत्त्वानाम् अवबोधः ।

**उद्धेश्यानि :**

पाणिनीयशास्त्रं तथा संस्कृतं च परिचाययितुम् अयं विषयः ।
संस्कृताध्ययने व्याकरणस्य प्राधान्यावबोधनं, वेदाङ्गेषु तस्य प्राशस्त्यं च सूचयितुम् तस्य प्रामुख्यात् तदध्ययनं  उद्धेश्यम् ।
पाणिनीयतन्त्रे व्याकरणशास्त्रस्य स्वभावं प्राधान्यं च छात्रान् बोधयितुम् अयं विषयः ।

**विषयस्वरूपम् -**

**पाठ्यांशः १ – पस्पशाह्निकस्य पूर्वार्द्धम् ।**

गौरित्यत्र कः शब्दः – रक्षोहागमलघ्वसन्देहाः प्रयोजनम् – आनुषङ्गिकप्रयोजनानि - शब्दानुशासनं कथं कर्त्तव्यम्।

**पाठ्यांशः २ -**

सिद्धे शब्दार्थसम्बन्धे - शब्दस्य ज्ञाने धर्मः आहोस्वित् प्रयोगे – व्याकरणम् इति शब्दस्य कः पदार्थः - किमर्थो वर्णानामुपदेशः।

**पाठ्यांशः ३ – (प्रत्याहाराह्निके)**

अइउण् -अकारस्य विवृतोपदेशः आकारग्रहणार्थः वर्णसमाम्नाये जातिपक्षविचारः। ऋलृक् - लृकारोपदेशः किमर्थः। एओङ्, ऐऔच् - सन्ध्यक्षराणि तपराणि वा अतपराणि वा, वर्णैकदेशग्रहणम्।

**पाठ्यांशः ४ - (प्रत्याहाराह्निके)**

हयवरट् - हकारस्य द्विरुपदेशः - हयवरट् वा हरयवट् वा साधु - अयोगवाहाः - वर्णाः अर्थवन्तः आहोस्वित् अनर्थकाः – प्रत्याहारे अनुबन्धानां ग्रहणं कुतो न - णकारः द्विरनुबध्यते पूर्वश्चैव परश्च - ञमङणनम्, झभञ् - कुतः अत्र उभौ (म् च ञ् च) अनुबध्येते, न ञकारः एवानुबध्यते।

**पाठपुस्तकम् -**

महाभाष्यम् – पतञ्जलिः (प्रदीपोद्योत तत्त्वालोकव्याख्यानसहितः)

## V.D. 140Vy. व्यावहारिकसंस्कृतम् (मुक्तविषयः)

**उपलब्धयः - 4**

**पाठ्यकालांशाः – 90**

**लक्ष्यम् : -**

संस्कृते व्यवहारसामर्थ्यसम्पादनम्।

**उद्देश्यानि -**

1. वाचनसामर्थ्यसम्पादनम्।
2. लेखनसामर्थ्यसम्पादनम्।
3. सम्भाषणसामर्थ्यसम्पादनम्।
4. संस्कृते कथनपठनलेखनादिक्षमतानाम् आर्जनम्।

**विषयस्वरूपम् -**

**पाठ्यांशः १ – संस्कृतस्वाध्यायप्रथमदीक्षा। वाचिकाभ्यासः।**

**ग्रन्थः -**

संस्कृतस्वाध्यायप्रथमदीक्षा - राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली।

**पाठ्यांशः - २ - संस्कृतस्वाध्यायद्वितीयदीक्षा। लेखनाभ्यासः।**

**ग्रन्थः -**

कृत्स्वाध्यायप्रथमदीक्षा - राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली।

रूपचन्द्रिका - डा. रामरङ्गशर्मा, भारतीय विद्या प्रकाशन्, वाराणसी।

**पाठ्यांशः ३ -**

'संस्कृतसाहित्य का इतिहास' इति ग्रन्थे अधोनिर्दिष्टान् ग्रन्थकारान् आधारीकृत्य भाषणकौशलम्।

कालिदासः। अश्वघोषः। भारविः। भट्टिः। कुमारदासः। माघः। कविराजः। श्रीहर्षः। भर्तृहरिः। भासः। शक्तिभद्रः। भोजराजः।

**ग्रन्थः -**

संस्कृतसाहित्य का इतिहास, डा. शशी तिवारी, भारतीय विद्या प्रकाशन्, वाराणसी।

संक्षिप्तसंस्कृतसाहित्येतिहासः, आचार्य पृथ्वीपति दुबे, भारतीय विद्या प्रकाशन्, वाराणसी।

बृहत्संस्कृतनिबन्धकलिका, शिवप्रसादद्विवेदी, भारतीय विद्या प्रकाशन्, वाराणसी।

**पाठ्यांशः ४ -**

संस्कृतसाहित्य का इतिहास' इति ग्रन्थे अधोनिर्दिष्टान् विषयान् आधारीकृत्य लेखनकौशलम्। कथा, उपन्यासः, पत्रम् इत्येतेषां रचनाकौशलम्। कथारचना, उपन्यासरचना, पत्ररचना, ग्रन्थरचनाकौशलानि।

## षष्ठं षाण्मास्यम्

### VI.B.119 Vy धातुगणपरिचयः

**उपलब्धयः - 4**

**पाठ्यकालांशाः - 90 घण्डाः**

**लक्ष्यम् :**

क्रियारूपाणां परिचायनम्, पाणिनीय व्याकरणाधारेण।

**उद्धेश्यानि :**

१. धातुगणानां क्रियापदानां च परिचायनम्।
२. क्रियापदानां निष्पत्ति परिचायनम्।
३. गणपठितानां विकरणप्रत्ययानां बोधनं तत्र नियमानां अवबोधः च।

**विषयस्वरूपम् -**

**पाठ्यांशः १ -** भू धातोः एध् धातोश्च सर्वेषु लकारेषु प्रक्रिया।

**पाठ्यांशः २ -** अदादि जुहोत्यादि दिवादि गणेषु संख्यया निर्दिष्टानां सूत्राणां पठनम्।

अदादिगणः - 2423 - 2442.

जुहोत्यादिगणः - 2489 - 2504.

दिवादिगणः - 2505 - 2522.

पाठ्यांशः ३ – स्वादितुदादिरुधादिगणेषु -संख्यया निर्दिष्टानां सूत्राणां पठनम्।

स्वादिगणः - 2523 - 2553.

तुदादिगणः - 2534 - 2542.

रुधादिगणः - 2543 - 2546.

पाठ्यांशः ४ - तनादिक्र्यादि चुरादिगणेषु संख्यया निर्दिष्टानां सूत्राणां पठनम्।

तनादिगणः - 2547 - 2553.

क्रयादिगणः - 2554 - 2562.

चुरादिगणः - 2563 - 2574.

**पाठपुस्तकम् -**

सिद्धान्तकौमुदी (धातुप्रकरणम्), भट्टोजिदीक्षितः ।

**आधारग्रन्थाः -**

धातुरत्नाकर – मुनि श्रीलावण्य विजयसूरि, परिमल् पब्लिकेशन्स्, शक्तिनगरम्. नवदेहलि ।

## VI. B.120 Vy. प्रौढमनोरमा (संज्ञा, परिभाषा सन्धिः च)

उपलब्धयः - 4

पाठ्यकालांशाः - 90 घण्डाः

**लक्ष्यम् :**

पाणिनीयसूत्राणां व्याख्यानानां तेषां भाषाशैलीनां च परिचायनम् ।

**उद्धेश्यानि :**

१. पाणिनीयसूत्राणां व्याख्याने नियमानां अवगाहः ।
२. व्याकरणे व्याख्यानानां परिचायनम् ।
३. सूत्राणां व्याख्याने भाषाशैलीनां तन्त्राणां उपायानाञ्च परिचायनम् ।

**विषयस्वरूपम् -**

**पाठ्यांशः** १ - प्रौढमनोरमा - संज्ञाप्रकरणम्।

**पाठ्यांशः** २ - प्रौढमनोरमा - परिभाषाप्रकरणम्।

**पाठ्यांशः** ३ - सन्धिप्रकरणम् (अच्सन्धिः & प्रकृतिभावः)

ग्रन्थः -परिभाषेन्दुशेखरः।

**पाठ्यांशः** ४ - सन्धिप्रकरणम् आन्तम्।

ग्रन्थः - परिभाषेन्दुशेखरः।

**आधारग्रन्थाः -**

सिद्धान्तकौमुदी - भट्टोजिदीक्षितः।

लघुशब्देन्दुशेखरः

प्रौढमनोरमा

## VI.B. 121 Vy परिभाषेन्दुशेखरः १- ३०

उपलब्धयः - 4

पाठ्यकालांशाः - 90 घण्डाः

**लक्ष्यम् :**

पाणिनीयसूत्राणां व्याख्यानानां तेषां भाषाशैलीनां च परिचायनम् ।

**उद्धेश्यानि :**

१. पाणिनीयसूत्राणां व्याख्याने नियमानां अवगाहः ।
२. व्याकरणे व्याख्यानानां परिचायनम् ।
३. सूत्राणां व्याख्याने भाषाशैलीनां तन्त्राणां उपायानाञ्च परिचायनम् ।

**विषयस्वरूपम् -**

**पाठ्यांशः १** - परिभाषेन्दुशेखरः (परिभाषा १ – १८ )

**पाठ्यांशः २** - परिभाषेन्दुशेखरः (परिभाषा ९ – १५ )

**पाठ्यांशः ३** - परिभाषेन्दुशेखरः (परिभाषा १६ – २२ )

**पाठ्यांशः ४** - परिभाषेन्दुशेखरः (परिभाषा २३ – ३० )

**पाठपुस्तकम् -**

परिभाषेन्दुशेखरः ।

**आधारग्रन्थाः -**

लघुशब्देन्दुशेखरः ।

प्रौढमनोरमा ।

पदसंस्कारचन्द्रिका ।

लघुसिद्धान्तकौमुदी ।

# VI.B. 122 Vy कृत् तद्धितः च

**उपलब्धयः - 4**

**पाठ्यकालांशाः - 90 घण्डाः**

**लक्ष्यम् : -**

कृदन्तरूपाणां तद्धितान्तशब्दानाञ्च प्रयोगे सामर्थ्यसम्पादनम् ।

**उद्धेश्यानि : -**

१. कृत्यकृदन्तानां स्वरूपपरिचायनम् ।
२. तद्धितान्तानां स्वरूपपरिचायनम् ।

**विषयस्वरूपम् -**

**पाठ्यांशः १ - कृत्यप्रकरणे (सिद्धान्तकौमुदी) चितानि २५ सूत्राणि ।**

धातोः। वाऽसरूपोऽस्त्रियाम्। कृत्याः। कर्तरि कृत्। तयोरेव कृत्यक्तखलर्थाः। तव्यत्तव्यानीयरः (केलिमर् उपसंख्यानम्) कृत्यचः। णेर्विभाषा। कृत्यल्युटो बहुलम्। अचो यत्। ईद्यति। पोरदुपधात्। शकिसहोश्च। वह्यं करणम्। उपसर्या काल्या प्रजने। एतिस्तुशास्वृदृजुषः क्यप्। ह्रस्वस्य पिति कृति तुक्। मृजेर्विभाषा। ऋहलोर्ण्यत्। चजोः कु घिण्ण्यतोः। भोज्यं भक्ष्ये। वचोऽशब्दसंज्ञायाम्। वदः सुपि क्यप् च। शास इदङ्हलोः। मृजेर्वृद्धिः।

**पाठ्यांशः २ - पूर्वकृदन्तप्रकरणे (सिद्धान्तकौमुदी) चितानि ५० सूत्राणि ।**

ण्वुल्तृचौ। नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः। इगुपधज्ञाप्रीकिरः कः। आतश्चोपसर्गे।

ददातिदधात्योर्विभाषा। कर्मण्यण्। गेहे कः। विभाषा ग्रहः। आतोऽनुपसर्गे कः। (मूलविभुजादिभ्यः कः।) चरेष्टः। कृञो हेतुताच्छील्यानुलोम्येषु। एजे खश्। अरुर्द्विषदजन्तस्य मुम्। प्रियवशे वदः खच्। अन्येभ्योऽपि दृश्यन्ते। नेड्वशि कृति।विड्वनोरनुनासिकस्यात्। क्विप् च। सुप्यजातौ

णिनिस्ताच्छील्ये। मनः। आत्ममाने खश्च। खित्यनव्ययस्य। करणे यजः। दृशेः क्वनिप्। राजनि युधि कृञः। सहे च। सप्तम्यां जनेर्डः। तत्पुरुषे कृति बहुलम्। क्तक्तवतू निष्ठा। निष्ठा। रदाभ्यां निष्ठातो नः पूर्वस्य च दः। संयोगादेरातो धातोर्यण्वतः। ल्वादिभ्यः। यस्य विभाषा। हलः। आदितश्च। शुषः कः। पचो वः। क्षायो मः। निष्ठायां सेटि। दृढः स्थूलबलयोः। दधातेर्हिः। दोदद्घोः। लिटः कानज्वा। क्वसुश्च। म्वोश्च। लृटः शतृशानचावप्रथमासमानाधिकरणे। आने मुक्। युवोरनाकौ। अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य।

**पाठ्यांशः ३ - तद्धितेषु अपत्यप्रत्ययः।**

सिद्धान्तकौमुद्यां “समर्थानां प्रथमाद्वा” इत्यारभ्य “जीवति तु वंश्ये युवा” पर्यन्तम्।

**पाठ्यांशः ४ - इतरतद्धिताः।**

(अधोनिर्दिष्टानां सूत्राणाम् अर्थाः उदाहरणानि च। )

**रक्तादि प्रकरणम्।**

1. तेन रक्तं रागात्।
2. लाक्षारोचनाट्ठक्।
3. नक्षत्रेण युक्तः कालः।
4. संस्कृतं भक्षाः।
5. दध्नष्ठक्।

**चातुरर्थिकप्रकरणम्।**

1. तदस्मिन्नस्तीति देशे तन्नाम्नि।
2. तेन निर्वृत्तम्।
3. तस्य निवासः।
4. अदूरभवश्च।

**शैषिकप्रकरणम्।**

1. राष्ट्रावारपाराद्घखौ।
2. अव्ययात् त्यप्।

3. वृद्धाच्छः।

**प्राग्दीव्यतीयप्रकरणम्।**

1. तस्य विकारः।
2. अवयवे च प्राण्योषधिवृक्षेभ्यः।
3. फले लुक्।
4. स्वागतादीनाञ्च।

**प्राग्वहतीयप्रकरणम्।**

1. तरति।
2. चरति।

**प्राग्घितीयप्रकरणम्।**

1. तद्वहति रथयुगप्रासङ्गम्।
2. तेन तुल्यं क्रिया चेद्वतिः।

**पाठपुस्तकम् -**

सिद्धान्तकौमुदी - भट्टोजिदीक्षितः ।

## VI.B 123 Vy. - दर्शनपरिचयः

**उपलब्धयः** - 4

**पाठ्यकालांशाः** – 90 घण्डाः

**लक्ष्यम्** : -

दर्शनशास्त्रस्य सामान्यतत्त्वानां परिचायनद्वारा दर्शनानाम् अवबोधनम्।

**उद्देश्यानि -**

सर्वेषां दर्शनानां सामान्यज्ञानसम्पादनम्।

**विषयस्वरूपम् -**

**पाठ्यांशः १ -**

दर्शनशब्दस्य निष्पत्तिः, भारतीयदर्शनानि - आस्तिकनास्तिकभेदाः, जैनदर्शनम् - ज्ञानम्, न्यायः - अनेकान्तवादः, स्याद्वादः, बौद्धदर्शनम् - चत्वारः पक्षाः, शून्यवादः, विज्ञानवादः, अपोह्वादः, चार्वाकदर्शनम् - निरुक्तिः, प्रमाणानि, सिद्धान्ताश्च।

**पाठ्यांशः - २**

न्यायवैशेषिके - पदार्थाः, प्रमाणानि, बन्धः, मोक्षः अनयोः दर्शनयोः साजात्यवैजात्ये।

**पाठ्यांशः ३ -**

सांख्ययोगौ - सांख्यानां 25 तत्त्वानि, प्रमाणानि, सत्कार्यवादः, योगः - चित्तवृत्तयः, अष्टाङ्गयोगाः, समाधिः, ईश्वरः।

**पाठ्यांशः ४ -**

पूर्वमीमांसा & उत्तरमीमांसा - प्रमाणानि, धर्मः, भावना, शाङ्करवेदान्तः, रामानुजवेदान्तः, माध्ववेदान्तः, निम्बार्कवेदान्तः, वल्लभवेदान्तः।

**पाठ्यांशः ५ - प्रकृतिदर्शनम्**

वेदकालादारभ्य नूतनकालं यावत् पारिस्थितिकावबोधनम्।

वेदेभ्यः, इतिहासपुराणकाव्येभ्यः चिताः श्लोकाः।

<u>अथर्ववेदः</u>

<u>भूमिसूक्तम्</u>

१. सत्यं बृहद्वतमुग्रं दीक्षा तपो ब्रह्म
    यज्ञः पृथिवीं धारयन्ति ।
  सा नो भूतस्य भव्यस्य पत्न्युरुं
    लोकं पृथिवी नः कृणोतु ।।१।।

२. असंबाधं  बध्यतो मानवानां यस्या
उद्वतः प्रवतः समं बहु ।

नानावीर्या ओषधीर्या बिभर्ति पृथिवी

नः प्रथतं राध्यतां नः ।।२।।

३. यस्यां समुद्र उत सिन्धुरापो
यस्यामन्नं कृष्टयः संबभूवुः ।
यस्यामिदं जिन्वति प्राणदेजत्सा नो भूमिः
पूर्वपेये दधातु ।।३।।

४. यस्यामापः परिचराः समानीरहोरात्रे
अप्रमादं  क्षरन्ति  ।
सा ने भूमिर्भूरिधारा पयो दुहामथो
उक्षतु वर्चसा ।।९।।

<u>महाभारतम्</u>

<u>शान्तिपर्वम्</u>

१. वृक्षदं पुत्रवद् वृक्षाः
तारयन्ति परत्र च
रोप्याः श्रेयोर्थिना सदा
पुनवत् परिपाल्याश्च
पुत्रास्ते धर्मतः स्मृतः ।।

२. स्थावराणाञ्च भूतानां जातयः षट् प्रकीर्तिताः
वृक्षगुल्मलतावल्ली त्वक्सारास्तृणजातयः ।।

३. सुखदुःखयोश्च ग्रहणात्
छिन्नस्य च विरोहणात्
जीवं पश्यामि वृक्षाणाम्
अचैतन्यं न विद्यते ।।

<u>पुराणम्</u>

भविष्यत्पुराणम्

अश्वत्थमेकं पिचुमर्द्दमेकं
न्यग्रोधमेकं दश चिञ्चिणीकं
कपित्थबिल्वामलकत्रयं च
पञ्चाम्रवापी नरकं न पश्येत् ।।

मत्स्यपुराणम्

दशकूपसमा वापी दशवापीसमो ह्रदः
दशह्रदसमः पुत्रः दशपुत्रसमो द्रुमः ।।

**काव्यम्**

रघुवंशम् पञ्चमः सर्गः ।

१. आधारबन्धप्रमुखैः प्रयत्नैः
संवर्धितानां सुतनिर्विशेषम् ।
कच्चिन्न वाय्वादिरुपप्लवो वः
श्रमच्छिदामाश्रमपादपानाम् ।।६।।

२. क्रियानिमित्तेष्वपि वत्सलत्वा –
दभग्नकामा मुनिभिः कुशेषु ।
तदङ्कशय्याच्युतनाभिनाला
कच्चिन्मृगीणामनघा प्रसूतिः ।।७।।

**पठनग्रन्थाः -**

काश्यपसंहिता, अमरकोशः(ओषधिवर्गः)

**आधारग्रन्थाः -**

Outline of Indian Philosophy - Dr. M. Hiriyanna

Indian Philosophy - Dr. S. Radhakrishnan.

History of Indian Philosophy - S. N. Dasguptha

A Critical Survey of Indian Philosophy - Dr. Chandradhar Sharma

सर्वदर्शनसङ्ग्रहः, न्यायसिद्धान्तमुक्तावली, तर्कसङ्ग्रहः, साङ्ख्यकारिका, पातञ्जलयोगसूत्रम्, अर्थसङ्ग्रहः, Buddhism – four noble truths, The eight fold path